श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

॥ पिळ्ळैयन्दादि ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ पिळ्ळैयन्दादि ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीतूप्पुल्प्रियनन्दनाङ्घ्रियुगलस्यान्तादिका गाधिकाः
लोकोज्जीवनहेतुतः श्रुतिनिगूढार्थान्विता द्राविडीः।
भक्त्या यो विरचय्य कर्णमधुरं तत्सन्निधौ सञ्जगौ
मित्रं तस्य गुणाकृतेश्च वरदाचार्यस्य पादौ हि नः॥

राजीवान्तर्निवासानिशवसतिसमुल्लासिवक्षःस्थलश्री -
कान्ताङ्घ्र्यब्जोत्तमाङ्गानवधिककरुणश्रीशठार्यङ्घ्रियुग्मे।
श्रीमद्रामानुजस्याभिलषितवसतेरद्भुतौदार्यशंसि -
श्रीमत्तूप्पुल् सुतस्याऽनघचरणयुगं राजते मस्तके मे॥ 1॥

यद्वन्मूर्धानमेन्नो गुरुचरणयुगं मानवा नेत्रयुग्मम्
आनन्दाश्रुप्रवर्षं सततमनुभवेत् तीव्रदुःखं प्रणश्येत्।
व्योम्नानन्दः परे स्यात् परम उरुयशस्तूप्पुलग्रेसरस्य
तद्वन्नित्यं पदाब्जं शिरसि सुनिहितं सः कदा वा भवेन्नु॥ 2॥

जीवोज्जीवप्रवृत्तश्रुतिनिवहविदः शास्त्रसन्दोहवेत्तुः
सम्यक्तत्त्वार्थबोद्धुः शरणवरणसन्दर्शिनो योगिनेतुः।
श्रीमद्रामानुजस्य स्तुतिमनवरतं कुर्वतस्तूप्पुलिन्दोः
गानाच्छ्रेयः प्रदानात् परमिह परतो नास्ति नोज्जीवनार्थम्॥ 3॥

वेद्यां कस्योत्तरायामुदितमुरुदयं ध्यायतः श्रीधरं तम्
सत्यैकालम्बिशीलोत्तरमुनितिलकस्यार्यरामानुजस्य।
कारुण्यं ह्यात्मजीवातुरिति दृढधिया ब्रह्मतेजस्वितूप्पुल् -
नन्देनोक्तात् कलौघात् परमिह न भवेत् अस्मदुत्तारमन्त्रम्॥ 4॥

सृष्ट्यादौ लोकमीशस्तदनुकरुणया सत्त्वपूर्णं कलौघम्
व्यातन्वन् सर्वजीवातिशयकुशललाभाय सत्कीर्तिमूर्तिम्।
प्राप्याऽथो वेङ्कटाद्रिं निरवधिकयशोरूपमादाय भूयः
तूप्पुल् श्रीवेङ्कटेशाह्वयमवनितरेऽनादिपापान्यलुम्पत्॥ 5॥

नानाशास्त्रप्रवीणो निखिलनिगमवागर्थविद्भेदमौलेः
आचार्योऽस्मत्तपस्याफलत उदितवान् तूप्पुलग्रस्थलेऽग्र्यः।
सूरीन्द्रो वेङ्कटेशो बहुविधसुकलालोलजिह्वाप्रघोष -
प्रध्वस्तारातिचक्रस्त्विति हि समनवं नैक्ष एनो ममोग्रम्॥ 6॥

अद्याऽऽरभ्याऽघसङ्घाः ! मदितरपदमन्वेषणीयं भवद्भिः
रोषान्मां हिंसितुं वो न भवति सुकरं प्रागिवाऽतोपयात।
एतच्चैवं कुतश्चेत् यतिकुलपतिरामानुजार्योक्तिलीला -
लोलः श्रीतूप्पुलार्यो विलसति हृदयं गाढमाविश्य यन्मे॥ 7॥

अत्यल्पानित्यहीनायनगतिसुभरात्मोदराः भो ! नराः कौ
सुष्ठूपायं विमुक्तेः विषहनिरयतो नैव जानीथ यूयम्।
युष्माकं तं ब्रुवेऽहं निशमयत भवाम्भोधिदुःखापनुत्यै
तूप्पुल्जातस्य पादौ प्रणमत ! महतः पूरुषस्याऽऽशुभक्त्या॥ 8॥

सिद्ध्येयुः प्रश्रितत्वं मृदुशुभचरिताचारकारुण्यभावाः
नश्येयुर्नीचसङ्गोऽमतिरघनिचयोऽशुद्धिभावश्च तेषाम्।
श्रीमद्रामानुजस्य प्रगुणगुणनिधेस्तावकं सद्गुणानाम्
श्रीतूप्पुल् सूरिवर्यं ह्यनितरशरणा येऽति भक्त्या प्रपन्नाः॥ 9॥

आत्मैकालम्बिरक्ष्याश्रितदुरघमपोह्याऽनुकम्पाभिवर्षिन् !
तूप्पुल् स्वामिन् गुरो ! मे निजमहिमविदां कल्पभूजातकल्पः !।
संसारावर्तदुःखाधिकजलधिनिमग्नस्य पाशान् मदीयान्
विच्छिद्याऽद्धा प्रदेहि त्वदुभयपदनिर्वर्णनस्थास्नुसेवाम् ॥ 10 ॥

कल्पक्षोणीरुहेति क्षितिगतधनिकान् संस्तुयां नैव वाचा
शैलेत्युग्रं तपस्यन् तनुमिह न दहेयं कथञ्चित् कदाऽपि।
विज्ञाताशेषतन्त्राऽप्रतिमकविमणे ! भक्तबृन्दस्तुतश्री
तूप्पुल् जाताऽद्भुत ! त्वं निरुपधिदयया मां च मुक्तं विधत्स्व ॥ 11 ॥

कोऽप्यग्र्यो नास्त्युपायो मयि तदपि विमोहाधिकश्चाऽस्मि हन्त !
श्रुत्युक्ताचारहीनस्तदितरदुरनुष्ठाननिष्ठोऽभवं भोः।
विज्ञानोत्पत्तिभूमे ! श्रुतिशिखरगुरूत्तंस ! भाग्याधिकास्म -
त्तूप्पुल् देवेत ऊर्धं नहि तव करुणायाः परो मे दयस्व ॥ 12 ॥

कर्मज्ञानाद्यभक्त्याचरण इह न मे शक्तिराहो विरक्तिः
विश्वासो वा प्रगाढो न च विधिविहितो न्यासकृत्येऽपि वास्ते।
तप्तस्वर्णाभमूर्ते प्रविलसदनघोदारकीर्ते सुतूप्पुल्
स्वामिन् ! त्वत्पादपाथोरुहयुगमधुना विस्मरेयं हि नैव ॥ 13 ॥

भक्तिः साक्षात्त्वदग्रे मम पुनरचला न त्वदङ्घ्र्याश्रितेषु
प्रीतिर्वा नैव जातेत्यथ यदि मनुषे भोः फलं किं ततः स्यात्।
दोषस्पृग्दूरतूप्पुल् व्युदितविभुमणे पूर्णकारुण्यवर्षं
युष्मच्छीलानुरूपं गुरुवर मयि संवर्ष हर्षाज्जनिघ्नम् ॥ 14 ॥

मान्यो नान्यः सहायो निरुपधिकरुणायास्तवास्ते ममातः
प्रौढे मेऽपास्य दुःखे हिततममपि विज्ञाय भूयस्त्वमेव।
श्रीमत्प्रेष्ठाष्टवर्णं मनुमनु पठितुं ताश्च निष्ठा वरिष्ठाः
स्वामिन्नद्य प्रदेयाः सदभिविनुततूप्पुल् कुलैकप्रदीप ॥ 15 ॥

विख्याते वेङ्कटाद्रावनुकलविलसद्दिव्यदीपेऽखिलापे
पद्मावासातिरम्यप्रसरसुरभितश्रीसमाश्लिष्टहृत्के।
युष्मद्भक्तेषु शुद्धाधिकमतिषु परां मे च सङ्कल्प्य भक्तिम्
तादृक्षेषु त्वमेतामपनुद कपटां पाहि तूप्पुल् सुरक्षिन्॥ 16॥

अस्मत्संरक्षकश्रीघटजलकुलपत्यार्यरामानुजस्य
स्यन्दन्माध्वीकरक्ताम्बुजचरणयुगं प्रेत्य नित्यं प्रणम्य।
तद्धर्षेक्षाभिवर्षश्रुतिशिखरयुगोल्लासिसारार्थवर्षिन्
भोः पूर्णत्राण तूप्पुल् कुलमहितपते ! सन्ततं पालयाऽस्मान्॥ 17॥

कारुण्यासारवर्षिन् ! श्रुतिशिखरगुरो ! पूत तूप्पुल् प्रभो ! नः
कव्यग्र्याहंयुतर्कप्रविदुरुमदहृत्केसरिन् ! वादिमर्दिन् !।
मूर्ध्न्याधायाञ्जलिं मे निशमय वदतोऽमुं हि विज्ञापनां भोः
युष्मद्भक्तैकसक्तं मम कुरु कृपया चित्तमश्रान्तमत्र॥ 18॥

भक्तात्यन्तेप्सिते त्वत्पद इह जयतां स्मेरवक्त्रं च शुद्धं
व्याख्यामुद्रः करस्ते जयतु विजयतां शुभ्रमुत्पुण्ड्रलक्ष्मीः।
दीव्यत्पद्माक्षमालात्रिगुणितमहिमब्रह्मसूत्रप्रकाशा
मूर्तिर्जेजीयतां ते निरवधिसमयं तूप्पुलुत्पन्नरत्न !॥ 19॥

शोभाभोगाङ्ग तूप्पुल्प्रभवगुरुवदान्यातिमृद्वङ्घ्रिपद्मे
प्रोद्गातुं संश्रितानां सुखकर मनवं विंशतिं चान्तिमादिम्।
भक्त्यैतां ये प्रहृष्टाः सुदृढमनुदिनं सादरं कीर्तयन्ते
तेषां पूतोत्तमाङ्गे विलसत इह तूप्पुल् गुरोः पादपद्मे॥ 20॥

श्रीमद्वेदान्तसूरिप्रगुणसुमहिता द्राविडोक्तौ सुगाधाः
चक्रे भक्त्या तदीयात्मजवरवरदस्सञ्ज्ञगौ सूरिवर्यः।
श्रीमद्वेदान्तरामानुजगुरुचरणासेवगोपालसूरिः
श्लोकीकृत्याखिलास्ता व्यवृणुत सुखबोधाय भाषाद्वयेन॥

॥ इति पिळ्ळैयन्दादि समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥